# Raja Punyanidhikritam Vishnu Stotram

# રાજા પુણ્યનિધિકૃતં વિષ્ણુસ્તોત્રમ્

## Document Information

Text title : Raja Punyanidhikritam Vishnu Stotram

File name : rAjApuNyanidhikRRitaMviShNustotram.itx

Category : vishhnu, vishnu, lakShmInArAyaNIyasaMhitA, stotra

Location : doc_vishhnu

Proofread by : PSA Easwaran

Description/comments : lakShmInArAyaNIyasaMhitA | khaNDa 1 | adhyAya 438/46-66||

Latest update : January 13, 2026

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

January 13, 2026

*sanskritdocuments.org*

# રાજા પુણ્યનિધિકૃતં વિષ્ણુસ્તોત્રમ્

રાજા વિષ્ણુસ્તુ વિપ્રરૂપં તુષ્ટાવ પ્રેમવિહ્વલઃ ।
નમસ્તે મે સુતાનાથ! પ્રસીદ કમલાપતે ॥ ૪૬॥

વિપ્રરૂપ નમસ્તુભ્યમપરાધં ક્ષમસ્વ મે ।
નમસ્તે પુણ્ડરીકાક્ષ ચક્રપાણે શ્રિયઃપતે ॥ ૪૭॥

નમઃ શ્રીવત્સચિહ્નાય નમઃ કૌસ્તુભધારિણે ।
પાર્વતીપતયે તુભ્યં લક્ષ્મીશાય નમોનમઃ ॥ ૪૮॥

માણિકીપતયે પ્રભાનાથાય વિષ્ણવે નમઃ ।
શ્રીનિવાસાય શ્રીકૃષ્ણનારાયણાય તે નમઃ ॥ ૪૯॥

પદ્મેશાય પદ્માવતીસ્વામિને હરયે નમઃ ।
પદ્મિનીશાય કૃષ્ણાય ભાર્ગવીશાય તે નમઃ ॥ ૫૦॥

નારાયણાય રામાય સીતાયાઃ પતયે નમઃ ।
સરસ્વતીપતયે તે ગઙ્ગાયાઃ સ્વામિને નમઃ ॥ ૫૧॥

વિરજાયાઃ પતયે તે શ્રીદુર્ગાપતયે નમઃ ।
મત્સુતાપતયે હંસામઞ્જુલાપતયે નમઃ ॥ ૫૨॥

કૃષ્ણવિપ્રાત્મને તુભ્યં હૃદન્તરાત્મને નમઃ ।
દયામૂર્તે નમસ્તુભ્યં કમ્ભરાપતયે નમઃ ॥ ૫૩॥

નમો ધ્વજધનુર્મત્સ્યશૂલહસ્તાય તે નમઃ ।
સ્વસ્તિવરદહસ્તાય કાન્તરૂપાય તે નમઃ ॥ ૫૪॥

મયા નિગડપાશાભ્યાં બદ્ધસ્ત્વં પરમેશ્વર ।
અજાનતસ્તે ભક્તસ્ય ત્વપરાધાન્ ક્ષમસ્વ મે ॥ ૫૫॥

એવં સ્તુત્વા કૃષ્ણનારાયણં શ્રીપુરુષોત્તમમ્ ।
પાદયોઃ પતિતઃ પશ્ચાલ્લક્ષ્મીં તુષ્ટાવ વૈષ્ણવીમ્ ॥ ૫૬॥

નમઃ કૃપાસ્વરૂપાયૈ સ્વલબ્ધાયૈ નમો નમઃ ।
નમઃ સુતાસ્વરૂપાયૈ દિવ્યદેવ્યૈ નમો નમઃ ॥ ૫૭॥

ગૂઢતન્વ્યૈ કૃષ્ણનારાયણપત્ન્યૈ ચ તે નમઃ ।
વિષ્ણુવક્ષોનિવાસાયૈ કમલાયૈ નમો નમઃ ॥ ૫૮॥

રાધાયૈ ચ સરસ્વત્યૈ પદ્મિન્યૈ તે નમો નમઃ ।
દુર્ગાયૈ ચ મહાલક્ષ્મ્યૈ શારદાયૈ ચ તે નમઃ ॥ ૫૯॥

ગઙ્ગાયૈ ચ તુલસ્યૈ ચ વૃન્દાયૈ તે નમો નમઃ ।
પદ્માવત્યૈ ચ ભાર્ગવ્યૈ કમ્ભરાયૈ ચ તે નમઃ ॥ ૬૦॥

સિદ્ધ્યૈ પુષ્ટ્યૈ સ્વધાયૈ ચ સ્વાહાયૈ સતતં નમઃ ।
દક્ષિણાયૈ મઙ્ગલાયૈ પાર્વત્યૈ ચ શ્રિયૈ નમઃ ॥ ૬૧॥

માણિક્યાયૈ પ્રભાયૈ ચ લલિતાયૈ ચ તે નમઃ ।
જયાયૈ જાનકીદેવ્યૈ દ્રૌપદ્યૈ તે નમો નમઃ ॥ ૬૨॥

નારાયણ્યૈ ચ સન્ધ્યાયૈ ષષ્ઠ્યૈ દેવ્યૈ નમો નમઃ ।
માતૃકાયૈ ચ કૃષ્ણાયૈ મઞ્જુલાયૈ નમો નમઃ ॥ ૬૩॥

શ્રદ્ધામેધાભૂતિધાત્રીહંસાખ્યાયૈ ચ તે નમઃ ।
ધરણ્યૈ સર્વવિદ્યાયૈ બુદ્ધ્યૈ ગોપ્યૈ નમો નમઃ ॥ ૬૪॥

પ્રકૃત્યૈ તે જગન્માતઃ પુત્ર્યૈ ભૂયો નમો નમઃ ।
પુત્રીભાવે મયા ચાધિક્ષિપ્તં વા શાસનં કૃતમ્ ॥ ૬૫॥

ત્વદ્ગારકરણં લક્ષ્મિ! ક્ષમસ્વ મમ સર્વથા ।
લોકા વાં શિશવઃ સર્વે જગતાં પિતરૌ યુવામ્ ॥ ૬૬॥

સુતાપરાધઃ ક્ષન્તવ્યઃ પિતૃભ્યાં ચ પ્રસીદતમ્ ।

ઇતિ શ્રીલક્ષ્મીનારાયણીયસંહિતાયાં પ્રથમે કૃતયુગસન્તાને ૪૩૮-અધ્યાયાન્તર્ગતં
રાજા પુણ્યનિધિકૃતં વિષ્ણુસ્તોત્રં સમ્પૂર્ણમ્ ।

લક્ષ્મીનારાયણીયસંહિતા । ખણ્ડ ૧। અધ્યાય ૪૩૮/૪૬-૬૬॥

lakShmInArAyaNIyasaMhitA . khaNDa 1. adhyAya 438/46-66..

Proofread by PSA Easwaran

*Raja Punyanidhikritam Vishnu Stotram*

pdf was typeset on January 13, 2026

Please send corrections to *sanskrit@cheerful.com*